महाकविश्रीमदम्बिकादत्तव्यासविरचितः

शिवराजविजयः

(ऐतिहासिक-उपन्यासः)

प्रथमो विरामः   प्रथमो निश्वासः

"विष्णोर्माया भगवती यया सम्मोहितं जगत्"-(भागवतम्१०/१/२५)

"हिंस्रः स्वपापेन विहिसितः खलः साधुः समत्वेन भयाद् विमुच्यते" (भागवतम्१०/७/३१)

संस्कृत-प्रतिशब्दः- विष्णोर्माया=परब्रह्मणः सत्त्वप्रधाना शक्तिः, भगवती=समग्रषड्गुणसम्पना, ऐश्वर्यशालिनी, यया=मायया, जगत्=जंगमम्, सम्मोहितम्=समग्ररूपेण मोहितम्।

संस्कृतार्थः- परब्रह्मणः ऐश्वर्यशालिन्या सत्त्वप्रधानया शक्त्या जंगमं समग्ररूपेण मोहितम्।

संस्कृत-प्रतिशब्दः- हिंस्रः=घातकः, हिंसकः, खलः=दुष्टः, स्वपापेन=स्वस्यपापेन, विहिसितः=विनष्टः भवति, साधुः=सज्जनः, समत्वेन=विवेचकत्वेन, भयाद्=भीतेः संकटाद्, विमुच्यते=मुक्तोभवति।

संस्कृतार्थः- दुष्टः घातकः, हिंसकः स्वस्यपापेन विनष्टः भवति, सज्जनः खलु विवेचकत्वेनापगतभयो भवति।

व्याकरणम्- विष्णोर्माया=विष्+नुक्=विष्णु, तस्य विष्णोः माया=विष्णोर्माया । माया=मा+य+टाप् । भगवती=भज्+घ=भगः, भगः+मतुप्+ङीप्(स्त्री.) । सम्मोहितं=सम्+मुह्+णिच्+क्त । जगत्=गम्+क्विप् । स्वपापेन=स्वस्य पापेन(षष्ठी-तत्पुरुषः) तेन । विहिंसित=वि-हिंस्+क्त । विमुच्यते=वि-मुच्(क.वा.)+लट्+त ।

१. अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः । एषः भगवान् मणिराकाशमण्डलस्य चक्रवर्ती खेचर-चक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान्

पुण्डरीकपटलस्य, शोकविमोकः कोकलोकस्य, अवलम्बोरोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतुनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एतेनैव सम्पादिता युगभेदाः, एतेनैव कृताः कल्पभेदाः, एनमेवाऽऽश्रित्य भवति परमेष्ठिनः परार्द्धसंख्या, असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरुपतिष्ठन्ते। धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषाम्-इति उदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटीरात् निश्चक्राम कश्चित् गुरुसेवनपटुर्विप्रबटुः।

संस्कृतव्याख्या- सूर्यः आकाशस्थानां नक्षत्रानां रत्नतुल्यः । पूर्वदिग्भागस्य सः कर्णाभरणसरूपः। ब्रह्माण्डस्य सः प्रदीपतुल्यः। सः सूर्यः विहगकुलस्य राजा। एतस्य सूर्यस्य प्रकाशः लोहितवर्णयुक्तः रक्ताभसहितः। सः स्वस्य आलोकेन पृथिव्याः सर्वमालोकयति। कमलवृन्दानि सूर्यस्य आलोकेन एव फुल्लन्ति। रात्रौ चक्रवाकविहगस्य स्वप्रियया सह वियोगः भवति किन्तु पुनः प्रतः सूर्यस्यागमने तयोः मेलनं भवति। तस्मात् तयोः वियोगे यत् दुःखं जायते तस्य अयं सूर्यः नाशकः। मधुकराः मधूनामाहरणं कृत्वा जीवन्ति। ते पुष्पात् एव मधु स्वीकुर्वन्ति । सूर्यस्योदये पुष्पाणि विकसन्ति । तस्मात् मधुकरसमुदायस्य सूर्यः आधारभूतः। सर्वविधं शुभकार्यं दिवसे एव अनुष्ठीयन्ते। तस्मात् सूर्यः एव सकलकार्याणां प्रवर्तकः। सूर्यः उदेति चेदेव खलु दिवसः इति कथ्यते। तस्मात् दिवसस्य स्वामी सः सूर्यः। सूर्यस्य प्रभावेन दिवसः रात्रिः च भवति। तस्यैव प्रभावेण षट् ऋतवः प्रकृतौ दृश्यन्ते। उत्तरायनं दक्षिणायनं च अस्य एव विधीयते। सुर्यः एव सत्ययुगस्य त्रेतायुगस्य द्वापरयुगस्य कलियुगस्य च सम्पादकः। परार्द्धपर्यन्तं संख्यागणना सूर्यमाश्रित्य एव भवति। अयं सूर्यः एव जगत् पुनः पुनः सृजति पालयति नाशयति च। चत्वारः वेदाः सन्ति ते यथाः ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदश्चेति। वेदाः सूर्यमेवाधिक्येन स्तौति। गायत्रीमन्त्रस्य देवता सूर्यः एव। ब्राह्मणाः प्रत्यहं सूर्यस्योपासनां कुर्वन्ति। सूर्यः एव सूर्यवंशस्यादिपुरुषः। इत्थं भास्करं प्रणम्य एकः गुरुसेवानिष्ठः ब्राह्मणपुत्रः स्वस्य पर्णकुटिरात् वहिः आगतवान्।

२. “अहो! चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः, सन्धोपासन-समयोऽयमस्मद्गुरुचरणानाम्, तत् सपदि अवचिनोमि कुसुमानि” इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय, पुष्पावचयं कर्त्तुमारेभे।

बटुरसौ आकृत्या सुन्दरः वर्णेन गौरः जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चाऽऽसीत्।

संस्कृतव्याख्या- ततः स बटुः अचिन्तयत् यत् स बहुकालं शायितः। तेन हि पुण्यमयः कालः निद्रापरतन्त्रतया यापितः। इदानीं तस्य गुरुचरणानां सन्ध्योपासनासमयः। अतः स सत्वरं कुसुमानि अवचेतुं एकं कदलीपर्नमाच्छिद्य तत्र बालतृणसन्धनेन कुसुमस्थापनपात्रं निर्माय पुष्पाणि चेतुमारब्धवान्।

स बटुः मनोरमकायः धवलवर्णीयः जटाभिः ब्रह्मचारी षोडशवयस्कः शङ्खग्रीवः दीर्घभालः सुन्दरबाहुपेतः विस्तृतलोचनः चासीत्

३. कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परम-पवित्र-पानीयं परः सहस्र-पुण्डरीक-पटल-परिलसितं पतत्रिकुल-कूजित-पूजितं पयःपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर-झर्झर-ध्वनि-ध्वनित-दिगन्तरः फल-पटलाऽऽस्वाद-चपलित-चञ्चु-पतङ्गकुलाऽऽक्रमणाधिक-विनत-शाख-शाखि-समूह-व्याप्तः सुन्दर-कन्दरः पर्वतखण्ड आसीत्।

संस्कृतव्याख्या- गौरसिंहः यस्मिन् कुटीरे न्यवसत् तस्य चतुर्षु दिग्भागेषु परिवृत्य रम्भापादपाः वर्तन्ते स्म। तेन तत् कुटीरं कुञ्जायते स्म। परितश्चासन् पुष्पोद्यानि अस्य पूर्वतो वर्तते जलसम्पूरितः सरोवरः यत्र पवित्रास्वप्सु सहस्रशः श्वेताब्जानि शोभन्ते स्म। अपि तु पक्षिभिराकुलितः स तेषां कलरवैः सर्वदा मुखरितोऽवर्तत। दक्षिणत आसीद् एकः पर्वतखण्डो यस्य वृक्षा आसन् विहगकुलकलायभूताः। रम्यैः कन्दरैः सुशोभितात् तस्मात् पर्वतखण्डात् प्रच्यवन्त्याः निर्झरिण्या झर्झरध्वनिना चतुर्दिशो ध्वनिता अभवत्।

४. यावदेष ब्रह्मचारी बटुरलिपुञ्जमुद्धूय कुसुमकोरकानवचिनोति; तावत् तस्यैव सतीर्थ्योऽपरस्तत्समानवयाः कस्तूरिका-रेणु-रूषित इव श्यामः, चन्दन-चर्चित-भालः, कर्पूरागुरु-क्षोद-च्छुरित-वक्षो-बाहु-दण्डः, सुगन्ध-पटलैरुन्निद्रयन्निव निद्रा-मन्थराणि कोरकनिकुरम्बकान्तराल-सुप्तानि मिलिन्द-वृन्दानि झटिति समुपसृत्य निवारयन् गौरबटुमेवमवादीत्---

५. "अलं भो अलं! मयैव पूर्वमवचितानि कुसुमानि, त्वं तु चिरं रात्रावजागरीरिति क्षिप्रं नोत्थापितः, गुरुचरणा अत्र तडागतटे सन्ध्यामुपासते, संस्थापिता मया निखिला सामग्री तेषां समीपे। यां च सप्तवर्षकल्पाम्, यावनत्रासने निःशब्दं रुदतीम्, परम-सुन्दरीम्, कलित-मानव-देहामिव सरस्वतीं सान्त्वयन् मरन्द-मधुरा अपः पाययन्, कन्दखण्डानि भोजयन्, त्वं त्रियामाया यामत्रयमनैषीः; सेयमधुना स्वपिति, उद्बुद्ध्य च पुनस्तथैव रोदिष्यति, तत् परिमार्गणीयान्येतस्याः पितरौ गृहं च-"

इति संश्रुत्य उष्णं निःश्वस्य यावत् सोऽपि किञ्चिद् वक्तुमियेष तावदकस्मात् पर्वतशिखरे निपपात उभयोर्दृष्टिः।

संस्कृतव्याख्या- यदा गौरबटुः भ्रमरकुलं निर्वार्य कुसुमानि अवचिनोति स्म तदा तस्य सहाध्येता तत्समानवयस्कः श्यामबटुरागतः। श्यामबटुः दर्शनेनातीव श्यामलः। तस्य भालदेशः चन्दनचर्चितः, वक्षःस्थलं कर्पूरागुरुचूर्णलिप्तमासीत्। स शीघ्रमागत्य कुसुमाभ्यन्तरे निद्रात उत्थितानि मधुकरवृन्दानि समागत्य निवारयन् गौरबटुं कथितवान् यत् पुष्पचयनेन प्रयोजनं नास्ति। तेन पूर्वमेव कुसुमानि चिनाति। गौरबटुः तु रात्रौ बहुसमयम् जागरित आसीत्, अतः प्रातः स न उत्थापितः। गुरुचरणाः तडागतटे सन्ध्यावन्दनं कुर्वन्ति। तेषां सन्ध्योपासनसहायकानि द्रव्याणि श्यामबटुना संस्थापितानि। ततः स कथितवान् यद् यां सप्तवर्षकल्पां यवनभयेन क्रन्दतीं सन्त्वयन् त्वं अपः पापयन् मुनिभोज्यं भक्षयन् रात्रौ त्रीन् प्रहरान् यापितवान् सा कन्यका साम्प्रतं निद्राति। तस्याः रोदनं यथा न स्यादतः तस्याः पितरौ गृहं च भवनं च अन्वेष्टव्यमिति। एवं श्रुत्वा गौरबटुः यदा किञ्चिदुक्तमुद्यतः तदा द्वयोः हठात् पर्वतशृङ्गे दृष्टिपातरभवत्।

६. तस्मिन् पर्वते आसीदेको महान् कन्दरः। तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म। कदा स समाधिमङ्गीकृतवानिति कोऽपि न वेत्ति। ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं पूजयन्ति प्रणमन्ति स्तुवन्ति च। तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति, अन्ये च मार्कण्डेय इति विश्वसन्ति स्म । स एवायमधुना शिखरादवतरन् ब्रह्मचारि-बटुभ्यामदर्शि।

"अहो ! प्रबुद्धो मुनिः ! प्रबुद्धो मुनिः ! इत एवाऽऽगच्छति, इत एवाऽऽगच्छति, सत्कार्योऽयम्" इति तौ सम्भ्रान्तौ बभूवतुः।

संस्कृतव्याख्या- युगयुगान्तराणि तस्य पर्वतस्य कन्दरे एकः योगिराजः मुनिप्रवरः समाधिमग्नो वर्तते। तस्य प्रकृतं स्वरूपं न कोऽपि वेत्ति। केचित्तं कपिलः, केचित् जैगीषव्यं, इतरे लोमशं केदिद्वा तं मार्कण्डेयं जानन्ति विश्वसन्ति च। कपिलो हि सिद्धानाम् अग्रगण्यः सांख्यशास्त्रस्य प्रवक्ता मुनिसत्तमः । स हि वस्तुः श्रीविष्णोरंशावतारः "सिद्धानां कपिलो मुनिरि" ति भगवद्वचनात् जैगीषव्यः महाभारतोक्तः प्रख्यातः सिद्धमहर्षिः । योगबलेन आत्तशक्तिः स युगपत् सर्वलोकचारी अभवत्। लोमशः महाभारतवर्नितो मुनिविशेषो यो बहुशः पृथिव्याः प्रदक्षिणं कृतवान्। भगवता व्यासेन आदिष्टः सन् स वनवासकाले पाण्डवान् तीर्थस्थानानि नैकानि अदर्शयत्। मृकण्डमुनेरपत्यं मर्कण्डेयो भगवतः शिवस्याराधनां कृत्वा तत्प्रसादात् चिरजीवी बभूव । ग्रामपतयः तथा सर्वाः ग्राम्यप्रजाः समागम्य मध्ये मध्ये तस्मै पूजाप्रणामादिकं निवेदयन्ति स्म। किन्तु योगिराजस्य समाधिर्न भग्नः चित्तवृत्तिनिरोधो हि योगः। योगस्य चरमावस्था हि समाधिः। समाधिर्नाम ध्यानावस्थाविशेषो यत्र तत्त्वसक्षात्कारो भवति। तत्र बाह्यं रूपादिकं न प्रतीयते। बाह्यं किमपि वृत्तं निरुद्धचित्तं योगिनं न स्पृशति। अत एव पूजादिना स योगी न समाधित उत्थितः। स योगिराज इदानीं पर्वतात् अवतरति इति गौरबटुः श्यामबटुश्च दृष्टवान्।

७. अथ समापित-सन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञया नित्यनियम-सम्पादनाय प्रयाते गौरबटौ, छात्रगण-सहकारेण प्रस्तुतासु च स्वागत-सामग्रीषु, "इत आगम्यतां सनाथ्यतामेष आश्रमः" इति सप्रणाममभिगम्य वदत्सु निखिलेषु, योगिराज आगत्य तन्निर्दिष्ट-काष्ठ-पीठं भास्वानिवोदय गिरिमारुरोह, उपाविशच्च।

तस्मिन् पूज्यमाने, 'योगिराडुत्थित' इति, 'आयात' इति च आकर्ण्य कर्णपरम्परया बहवो जनाः परितः स्थिताः। सुघटितं शरीरम्, सान्द्रां जटाम्, विशालन्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीरां च वाचं वर्णयन्तश्चकिता इव सञ्जाताः।

अथ योगिराजं सम्पूज्य यावदीहितं किमपि आलपितुम्, तावत् कुटीराद् अश्रूयत तस्या एव बालिकायाः सकरुण-रोदनम्।

ततः ''किमिति ? कुत इति ? केयमिति ? कथमिति ?" पृच्छापरवशे योगिराजे ब्रह्मचारिगुरुणा वालिकां सान्त्वयितुं श्यामबटुमादिश्य कथितम्—

संस्कृतव्याख्या- प्रबुद्धो मुनिः अतः तस्य सत्कारो विधेयः इति गौरबटुः श्यामबटुः च हर्षान्वितः अभवत् । ततः सन्ध्यावन्दनादिक्रियां सम्पाद्य गुरुचरणाः समागताः । तदाज्ञया गौरबटुः नित्यनियमसम्पत्यये गतः । तदा छात्रगणसहिताः सर्वे स्वागतसामग्रीः सज्जीकृत्य 'अत्र आगम्यताम्, अलंक्रियताम् एष अश्रमः' इति सप्राणामं समागत्य वदन्त आसन्। ततः योगिराजः मुनिप्रवरः आगत्य मुनिनिमित्तनिर्दिष्टां दारुनिर्मितचतुष्पादिकां भास्वां इव दिवाकरः इव उदयगिरिं उदयाचलं आरुह्य उपविष्टवान्।

तस्य मुनिप्रवरस्य योगिराजस्य पूजनात्परं 'योगिराट् उत्थितः' इति, 'आयातः' इति च वार्तां कर्णपरम्परया श्रुत्वा बहवो जनाः आश्रमं आगताः। तस्य योगिराजस्य सुघटितः कायः, प्रगाढा जटा, विशालाः च अवयवाः, अङ्गारसदृशे नेत्रे, मनोहराः गम्भीराः च वाणी आसीत् । एतत् सर्वं प्रशंसन्तः जना चकिता अभवन्।

८. "भगवन् ! श्रूयतां यदि कुतूहलम् । ह्यः सम्पादित-सायन्तन कृत्ये अत्रैव कुशाऽऽस्तरणमधिष्ठिते मयि, परितः समासीनेषु छात्रवर्गेषु, धीर-समीर-स्पर्शेन मन्दमन्दमान्दोल्यमानासु व्रततिषु, समुदिते यामिनी-कामिनी-चन्दनबिन्दौ इव इन्दौ, कौमुदी-कपटेन सुधाधारामिव वर्षति गगने, अस्मन्नीतिर्वार्तां शुश्रूषुषु इव मौनमाकलत्सु पतंग-कुलेषु, कैरव-विकाश-हर्ष-प्रकाश-मुखरेषु चञ्चरीकेषु, अस्पष्टाक्षरम्, कम्पमान-निःश्वासम्, श्लथत्कण्ठम्, घर्घरितस्वनम्, चीत्कारमात्रम्, दीनतामयम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठतं क्रन्दनमश्रौषम्।

तत्क्षणमेव च “कुत इदम् ? किमिदमिति दृश्यतां ज्ञायताम्” इत्यादिश्य छात्रेषु विसृष्टेषु, क्षणानन्तरं छात्रेणैकेन भयभीता सवेगमत्युष्णं दीर्घं निःश्वसती, मृगीव व्याघ्राऽऽघ्राता, अश्रुप्रवाहैः स्नाता, सवेपथुः कन्यकैका अङ्के निधाय समानीता। चिरान्वेषणेनापि च तस्याः सहचरी सहचरो वा न प्राप्तः । तां च चन्द्रकलयेव निर्मिताम्, नवनीतेनेव रचिताम्, मृणाल-गौरीम्, कुन्दकोरकाग्रदतीम् सक्षोभं रुदतीम् अवलोक्याऽस्माभिरपि न पारितं निरोद्धुं नयनवाष्पाणि।

संस्कृतव्याख्या- योगिराजसपर्यायाः परं यदा तेन सह वार्तालापं कर्तुं चेष्टितवान् ब्रह्मचारिगुरुः तदा कुटीरात् यवनत्रस्ताया बालिकायाः सकरुणरोदनं श्रुत्वा ‘किमर्थं रोदनम्। कुतः क्रन्दनम् । का इयं रोदिति इति । क्रन्दनस्य किं कारणम् इति’ । इति योगिराजः पृष्टवान् । तदा ब्रह्मचारिगुरुः श्यामबटुं बालिका शान्तनाय आदिश्य योगिराजाय बालिका वृत्तान्तं कथितवान् ।

यदा ब्रह्मचारिगुरुः सायन्तनीं सन्ध्योपसनां समाप्य दर्भाशनासीनः छात्रपरिवेष्टितः सन् उपदेष्टुं उपविष्टः । तदा मन्दः मन्दः पवनस्पर्शेन लताः सञ्चल्यन्तः आसन्। यामिनीरूपाः कामिण्याः कपालबिन्दुरिव चन्द्रः उदयं गतः। जोत्स्नाब्याजेन आकाशः सुधाधारमिव वर्षन् आसीत्। पक्षिनः तथा मुका आसन्। यथा ते अपि ब्रह्मचारिगुरोः नीतिव्याख्यां श्रोतुकामाः। कुमुदविकाशेन हर्षं प्राप्तवन्त आसीत् तदा द्विरेफाः। तस्मिन्नेव समये ब्रह्मचारिगुरुः अस्फुटवर्णं वेपमानानिः सश्वनं चित्कारमात्रं दीनतायुक्तं दूरात् एकं क्रन्दनं श्रुतवान्।

तस्मिन्नेव समये ‘कुतः इदं रोदनम् । किं कारणम् अस्य’ इति ज्ञातुं ब्रह्मचारिगुरुः शिष्यान् आदिष्टवान्। छात्राणां मध्ये केनचित् यवनभयव्याकुला असहाया क्रन्दनरता कन्यका अङ्के कृत्वा समानीता । सा कन्या सन्तापेन दीर्घं निःश्वसती, व्राघ्याक्रान्ता हरिनी इव, अश्रुप्रवाहस्नाता, कम्पमाना आसीत् । बहुधा अन्वेषनेन अपि तस्याः सहचरं सहचरीं वा कोऽपि शिष्यो न प्राप्तवान्। चेत् तां बहुधां क्रन्दनरतां त्रस्तां च दृष्टा सर्वे एव आश्रमवासीनः अश्रुपातं कृतवन्तः।

९. अथ “कन्यके ! मा भैषीः, पुत्रि ! त्वां मातुः समीपे प्रापयिष्यामः, दुहितः ! खेदं मा वह, भगवति ! भुङ्क्ष्व किञ्चित्, पिब पयः, एते तव भ्रातरः, यत् कथयिष्यसि तदेव करिष्यामः, मा स्म रोदनैः प्राणान् संशयपदवीमारोपयः, मा स्म कोमलमिदं शरीरं शोकज्वालावलीढं कार्षीः” इति सहस्रधा बोधनेन कथमपि सम्बुद्धा किञ्चिद् दुग्धं पीतवती। ततश्च मया क्रोडे उपवेश्य, “बालिके ! कथय क्व ते पितरौ ? कथमेतस्मिन्नाश्रमप्रान्ते समायाता ? किं ते कष्टम् ? कथमरोदीः ? किं वाञ्छसि ? किं कुर्मः ?” इति पृष्टा मुग्धतया अपरिकलित-वाक्पाटवा, भयेन विशिथिलवचनविन्यासा, लज्जया अतिमन्दस्वरा, शोकेन रुद्धकण्ठा, चकितचकितेव कथं कथमपि अबोधयदस्मान् यद्—

“एषा अस्मिन्नेदीयस्येव ग्रामे वसतः कस्यापि ब्राह्मणस्य तनयाऽस्ति। एनां च सुन्दरीमाकलय्य कोऽपि यवन-तनयो नदीतटान्मातुर्हस्तादाच्छिद्य क्रन्दन्तीं नीत्वाऽपससार। ततः कञ्चिदध्वानमतिक्रम्य यावदसिधेनुकां सन्दर्श्य बिभीषिकयाऽस्याः क्रन्दन-कोलाहलं शमयितुमियेष; तावदकस्मात् कोऽपि काल-कम्बल इव भल्लूको वनान्तादुपाजगाम। दृष्ट्वैव यवन-तनयोऽसौ तत्रैव त्यक्त्वा कन्यकामिमां शाल्मलितरुमेकमारुरोह। विप्रतनया चेयं पलाश-पलाशि-श्रेण्यां प्रविश्य घुणाक्षरन्यायेन इत एव समायाता यावद् भयेन पुना रोदितुमारब्धवती, तावदस्मच्छात्रेणैवाऽऽनीते”ति।

संस्कृतव्याख्या- सर्वे आश्रमवासिनः बालिकायाः शान्तनाय बहुधा चेष्टितवन्तः। ते तां तस्या मातरं पितरं च प्रति निःश्वन्तीति उक्तवन्तः। बहुधा भोजनाय पानाय च अनुरुद्धा सा बालिका अत्यल्पं दुग्धं पयः पितवती।

पयः पानात्परं ब्रह्मचारिगुरुः तां प्रति तस्याः परिचयः कः, कथं सा अत्र सम्प्राप्ता, किं तस्या दुःखं इत्यादि प्रश्नान् पृष्टवान्। एवं पृष्टा सा सरलतया अज्ञातवचनचातुर्या, भयेन शिथिलवचनविन्यासा, लज्जया कोमलस्वरा, कष्टेन रुद्धकण्ठा आश्रमवास्तव्यान् उक्तवती यत् सा समीपवर्तिनः एकस्य ग्रामस्य ब्राह्मणस्य कन्यका।

कदाचित् मात्रा यदा ब्राह्मणकन्यका सा नदीतटे भ्रमति स्म तदा कोऽपि यवनयुवको मातुर्हस्तात् सप्रसभं तां अपहृत्य वनमार्गेन आगतः। सहसा मार्गमध्ये समापतिते कस्मिंश्चिद् भल्लुके भयाद् योवनोऽसौ शाल्मलीतरुं आरुरोह। बालिका अपि वनवर्तमना

किंशुकविटपपङ्क्तौ प्रविश्य घुणाक्षरन्यायेन आश्रमं समायाता क्रन्दनरता उद्धृता च तपोवनबालकेन इत्येवं बालिकावृत्तान्तं समाप्तम्।

कामान्धः स यवनो निर्दयेन हृदयेन अस्फुटस्वरामपि बालिकां तन्मातुः हृदयं शून्यं कुर्वन् अपहर्तुं न विचलितः अभवत्। एतेन यवनानां कीदृशी जघन्या कामलोलुपता इति स्पष्टम्। अतो भारतवर्षस्य अभ्योदयाय तेषां नाशः साधनीयः।

१०. तदाकर्ण्य कोपज्वालाज्वलित इव योगी प्रोवाच-"विक्रमराज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रवः ?"

ततः स उवाच-

"महात्मन् क्वाधुना विक्रमराज्यम्? वीरविक्रमस्य तु भारतभुवं विरहस्य गतस्य वर्षाणां सप्तदश-शतकानि व्यतीतानि। क्वाधुना मन्दिरे मन्दिरे जयजयध्वनिः ? क्व सम्प्रति तीर्थे तीर्थे घण्टानादः ? क्वाद्यापि मठे मठे वेदघोषः ? अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते; "क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित् तुलसीवनानि छिद्यन्ते, क्वचिद् दारा अपह्रियन्ते, क्वचिद् धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादाः, क्वचिद् रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः" इत्येव श्रुयतेऽवलोक्यते च परितः"।

संस्कृतव्याख्या- ब्रह्मचारिगुरुवचः श्रुत्वा क्रोधाग्निना समुद्दीपः इव मुनिप्रवरः विक्रमशासने एतादृशा दुराचारः कथमिति पृष्टवान्। वस्तुतस्तु तस्मिन् समये नासीद् विक्रमराज्यम्। विक्रमराज्ये समाधिम् आश्रित्य यदा स उत्थितस्तदा सप्तदश-शतवर्षाणि अतिक्रान्तानि।

अतः ब्रह्मचारिगुरुः योगिराजं प्रति कथितवान् यद्- इदानीं नास्ति विक्रमसमयः। यवनकाले अस्मिन् वेदघोषमुखरिताया भारतभूमेः धर्मीयं परिमण्डलं अवलुप्तम्। इदानीं तु प्रति मन्दिरं जय जय नादः, प्रति तीर्थं घण्टानादः, प्रति मठं वेदघोषः अवलुप्तः। इदानीं यवनाः वेदानां स्मृतिशास्त्राणां पुराणानां भाष्याणां च सनातनधर्मप्रतीकानां विनाशं विदधति। ते मन्दिराणि तुलसीवनानि च नाशयन्ति। क्वचिद् ते परस्त्रीयां सुवर्णादिद्रव्याणां च अपहरणं कर्वन्ति। एवं सर्वासु दिक्षु आर्तनादाः, शोणितप्रवाहाः, अग्निदाहः भवनविनाशः इत्येवं

पातकमयानि यवनानां कर्याणि दृश्यन्ते । एवं यवनानां दुराचारः सखेदं वर्णितो ब्रह्मचारिगुरुणा।